# अभ्यास-प्रश्नपत्रम् (2025)

## कक्षा – एकादशी

## संस्कृतम् (केन्द्रिकम्) (कोड सं.-322)

**समयः – होरात्रयम्** **सम्पूर्णाङ्काः – 80**

**वार्षिकमूल्याङ्कनाय निर्मिते प्रश्नपत्रे भागपञ्चकं भविष्यति -**

| | | |
|---|---|---|
| **'क' भागः अपठित - अवबोधनम्** | **-** | **10अङ्काः** |
| **'ख' भाग: रचनात्मक कार्यम्** | **-** | **15 अङ्काः** |
| **"ग" भागः अनुप्रयुक्त - व्याकरणम्** | **-** | **20 अङ्काः** |
| **“घ' भागः** | **-** | **35 अङ्काः** |
| (i) **पठितावबोधनम्** | **-** | **(25 अङ्काः)** |
| (ii) **संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः** | | **(10 अङ्काः)** |

**सामान्यनिर्देशाः -**

- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

# “क” भागः - अपठितावबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत - 10**

विद्यार्थिजीवनं मानवजीवनस्य स्वर्णिम: कालोऽस्ति । अस्मिन् काले एव मानवस्य निर्माणं भवति । अस्मिन् समये अर्जिताः संस्काराः मनुष्यजीवने स्थायीरूपेण संस्थिताः भवन्ति | वस्तुतः अस्य जीवनस्य सफलता एव मानवजीवनस्य सफलता

वर्तते। अस्माकं शास्त्रेषु मानवजीवनं चतुर्षु आश्रमेषु विभक्तीकृतं विद्यते । तेषु प्रथमः ब्रह्मचर्याश्रमः वर्तते। अयमेव विद्यार्थिजीवनं छात्रजीवनं वा कथ्यते। छात्रजीवने विद्यार्थी संस्कारान् लभते। अस्मिन् समये तस्य चरित्रनिर्माणं भवति । अस्मिन् एव समये विद्यार्थिनः स्वतपोमयेन जीवनेन कठोरव्रतेन च ज्ञानार्जनं कुर्वन्ति, कठोरव्रतं च आचरन्ति। अस्मिन् काले अर्जितेन ज्ञानेनैव सः स्वजीवने साफल्यं भजते। विद्यार्थिनः एव भाविनः नागरिकाः अस्माकं देशस्य च कर्णधाराः सन्ति । ते खलु समाजस्य राष्ट्रस्य च विकासाय सक्षमाः भवन्ति। अतएव छात्रैः सदैव अस्य स्वर्णावसरस्य सदुपयोगः कर्तव्यः, कदापि समयस्य विनाशः न कर्तव्यः।

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** 1x2=2

(i) प्रथमः आश्रमः कः?

(ii) मानवजीवनस्य स्वर्णिमकालो किम् अस्ति?

(iii) छात्रैः कस्य विनाशः न कर्तव्यः?

(आ) **पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** 2x2=4

(i) अस्माकं देशस्य कर्णधाराः के सन्ति?

(ii) विद्यार्थिजीवने अर्जिताः संस्काराः कीदृशाः भवन्ति?

**(iii)** विद्यार्थिनः कथं ज्ञानार्जनं कुर्वन्ति?

**(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत?** 1x1=1

**(ई) यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्)** 1x3=3

(i) "चतुर्षु आश्रमेषु विभक्तीकृतं विद्यते" अत्र विशेष्यपदं किम्?

(क) चतुर्षु (ख) आश्रमेषु

(ग) विभक्तीकृतंः (घ) विद्यते

(ii) “अस्मिन् समये तस्य चरित्रनिर्माणं भवति” अत्र ‘तस्य’ इति पदं कस्मै प्रयुक्तम्?

(क) विद्यार्थिने (ख) मानवजीवनाय

(ग) समाजाय (घ) संस्काराय

(iii) “विनाशाय” इत्यस्य विलोमपदम् अनुच्छेदे किं प्रयुक्तम्?

(क) विकासाय (ख) सफलता

(ग) कठोरव्रतेन (घ) सदुपयोगः

(iv) “सः स्वजीवने साफल्यं भजते” अत्र क्रियापदं किम्?

(1) सः (ख) स्वजीवने

(ग) साफल्यं (घ) भजते

## “ख” भागः -- रचनात्मककार्यम्

**2. राजस्थाने छात्रावासे निवसतः भवतः नाम सुमितः अस्ति। मित्रं प्रति लिखितं रक्तदानशिविरविषयकम् इदं पत्रं मञ्जूषापदैः पूरयित्वा पुनः लिखत।** **1/2x10=5**

छात्रावासत:

राजस्थानम्

तिथिः.........

प्रिय मित्र नरेश!

सादरं (i) ............

अत्र कुशलं तत्रापि अस्तु। अद्य अहं भवन्तं निवेदयामि यद् अस्माकं विद्यालये गतसप्ताहे (ii) .......... आयोजितम्। अस्माकं कक्षाध्यापकः अस्य शिविरस्य प्रमुखः

(iii) ........ आसीत्। सः प्रथमं (iv)......... प्रायच्छत्। तदनन्तरम् विद्यालयस्य प्रधानाचार्यः अध्यापकाः द्वादशकक्षायाः पञ्च (v) ......... एतस्मिन् शुभकार्ये अग्रेसराः अभवन्। तेषाम् उत्साहं (vi) ........ मम मनसि अपि भावना संजाता तथा च मयाऽपि स्वरक्तं (vii)......... | भवान् अपि स्वविद्यालये रक्तदानस्य महत्त्वस्य विषये जनान् (viii)............. | अहं पूर्णतया सकुशलोऽस्मि । (ix).......... चिन्तया।

भवतः सुहृत्

(x)..........

**मञ्जूषा**

| |
|---|
| दत्तम्, रक्तदानशिविरम्, सुमितः, स्वरक्तं, , दृष्ट्वा, अलं, नमस्ते, आयोजकः, छात्राः, वदतु |

**3.अधः प्रदत्तं चित्रम् आधृत्य पञ्चविंशतितः त्रिंशत्परिमितैः शब्दैः अनुच्छेदमेकं लिखत। सहायतार्थं मञ्जूषायां पदानि प्रदत्तानि सन्ति। 5×1=5**



| |
|---|
| **मञ्जूषा -** पुस्तकालयस्य , अनेके ,सन्ति, उपविष्टाः , पुस्तकानि , समाचारपत्रम् , चित्रम् , बालिका , पठति , अनेकानि , अस्ति , सर्वे , मग्नाः , एकः , पुस्तकपठने |

**अथवा**

**अध: प्रदत्तं विषयम् आधृत्य पञ्चविंशतित: त्रिंशत्परिमितैः शब्दैः अनुच्छेदमेकं लिखत। सहायतार्थं मञ्जूषायां पदानि प्रदत्तानि सन्ति।**

**विषयः - प्रकृतेः उपकारः**

| |
|---|
| **मञ्जूषा -** परोपकारम् , प्रकृतिः , वृक्षाः , नद्यः , सूर्यः , परोपकाराय , करोति , कृतज्ञता, वहन्ति , महापुरुषाः , फलन्ति , प्रकाशम् , पुण्याय , ददाति , भवति |

**4. मञ्जूषायां प्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत-** **1/2x10=5**

एकदा एकः कर्तव्यनिष्ठः (i)......... आसीत्। इतस्ततः भ्रमन् सः एकम् अशीतिवर्षीयं (ii) ........ अपश्यत्। सः आम्रवृक्षस्य (iii).......... लग्नः आसीत्। इदं दृष्ट्वा नगररक्षकः तं महापुरुषम् अवदत्- अवलोकनेन प्रतीयते यत् यदा एषः (iv)........ फलिष्यति तदा तु भवान् जीवितः न भविष्यति। अतः किमर्थं वृथा (v).......... करोति भवान् ? महापुरुषः हसित्वा अवदत् पश्यन्तु एतान् (vi) ......... वृक्षान्। एतेषाम् आरोपणं मया न कृतं परं फलानि अहं (vii) ......., संतुष्टः भवामि। अतः यदा मम आरोपितस्य वृक्षस्य फलानि अन्ये (viii)............ अहं पुनः प्रसन्नः भविष्यामि। महापुरुषस्य (ix).......... श्रुत्वा तं च नमस्कृत्य नगररक्षकः उक्तवान् सज्जनता (x) ..... खलु। सः प्रसन्नः भूत्वा ततः प्रस्थितः।

**मञ्जूषा-**

| |
|---|
| आरोपणे, फलयुक्तान्, नगररक्षकः, खादिष्यन्ति, वृक्षः, परिश्रमं, महापुरुषम्, वचनं, अनुकरणीया, खादित्वा |

**<u>अथवा</u>**

**अधोलिखितसंवादे रिक्तस्थानानि पूरयन्तु।** 1x5=5

**रजतः -** मित्र! भवान् बहुदिवसानन्तरं विद्यालयम् आगतवान् किमभवत्?

**रूपकः - (i) ............................................... |**

**रजतः -** अहो! डेंगू इति रोगेण पीडितः आसीत् |

भवान् कस्य चिकित्सकस्य पार्श्वे निरीक्षणाय गतवान्?

**रूपकः - (ii)............................................ |**

**रजतः -** सुश्रुतमहोदयस्तु अतीव प्रसिद्धः चिकित्सकः अस्ति | तेन किं कथितम्?

**रूपकः - (iii)............................................ |**

**रजतः -** यकृदपि (Liver) स्थूलः अस्वस्थः च अस्ति | इदानीं भोजने किं खादति?

**रूपकः - (iv)................................................ |**

**रजतः -** शोभनम्, इदानीं लघु तरलं कृशरं करम्भकम् इत्यादिकं भोजनं

स्वास्थ्यप्रदं भवति | मित्र! यथासमयम् औषधं स्वीकरोतु

स्वच्छतायाः उपरि च विशेषेण ध्यानं ददातु |

**रूपकः - (v)................................................. |**

## "ग" भागः - अनुप्रयुक्तं व्याकरणम्

**5. अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नत्रयम्)** **1x3=3**

(i) लघुमूलं **महा + उदयम्** ।

(ii) मदीये उटजे मृत्तिका-**<u>मयूरस्तिष्ठति</u>** ।

(iii) मुनिः **<u>बहिरागत्य</u>** अपश्यत् ।

(iv) **<u>अचिरात् + च</u>** प्रशान्ते तस्मिन् ।

**6. अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं च प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नत्रयम्)** **1x3=3**

(i) ग्राम्यजनाः अवश्यं **<u>शिक्ष् + णिच् + तव्यत्</u>** ।

(क) शिक्षयितव्यत् (ख) शिक्षयितव्याः

(ग) शिक्षतव्यत् (घ) शिक्षणीयः

(ii) सर्वभूतहिते **<u>रम् + क्त</u>** ।

(क) रताः (ख) रसाः

(ग) रमताः (घ) रंक्ताः

(iii) तातस्तु तद् **<u>अवलोक्य</u>** ।

(क) अव + लोक् + य (ख) अव +लोक्य

(ग) अव + लुक् + यत् (घ) अव+ लुक् + ल्यप्

(iv) निमित्तं **<u>सूचयित्वा</u>** ।

(क) सूच् + क्त्वा (ख) सूच् + यित्वा

(ग) सूचयि + त्वा (घ) सूच् + यि + त्वा

**7. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः समुचितशब्दं चित्वा रिक्तस्थानानि पूरयत। (केवलं प्रश्नत्रयम्) 1x3=3**

(i) बालकः ............ कम्पते क्रन्दति च |

(क) भयम् (ख) भयाय

(ग) भयस्य (घ) भयेन

(ii) तन्तुवाय! अस्य ......... किम्?

(क) पटस्य (ख) पटात्

(ग) पटेन (घ) पटे

(iii) एषा केसरिणी .......... लङ्घयिष्यति |

(क) त्वं (ख) युवाम्

(ग) यूयम् (घ) त्वाम्

(iv)........... पल्लवासने समुपाविशत् |

(क) शबरसेनापतिना (ख) शबरसेनापतिः

(ग) शबरसेनापतिम् (घ) शबरसेनापत्ये

**8. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः समुचितक्रियापदं चित्वा रिक्तस्थानानि पूरयत। (केवलं प्रश्नत्रयम्) 1x3=3**

(i) अहम् अनेनैव ............ |

(क) क्रीडिष्यति (ख) क्रीडिष्यन्ति

(ग) क्रीडिष्यामि (घ) क्रीडिष्यामः

(ii) तस्य पश्चिमे तीरे महाजीर्णः शाल्मलीवृक्षः ........... |

(क) आसन् (ख) आसीत्

(ग) आसम् (घ) आस्ताम्

(iii) त्वं भक्तं वेतनं च सप्राप्तकालं ........... |

(क) ददासि (ख) ददाति

(ग) ददामि (घ) ददति

(iv) जनाः तस्य एव जलम् आनीय ........... |

(क) पिबति (ख) पिबसि

(ग) पिबन्ति (घ) पिबामि

**9. समुचितं उपपदविभक्तिरूपं लिखत- (केवलं प्रश्नत्रयम्) 1x3=3**

(i) वयं इतोप्यधिकं पारितोषिकं ......... दास्यामः | (भवत्)

(ii) .......... परितः नाना वृक्षाः सन्ति | (पुष्करिणी)

(iii) ज्ञानम् .............. श्रेयः | (अभ्यास)

(iv) रामः ........ भरतं परिजग्राह | (पाणि)

**10. अधोलिखितवाक्येषु वाच्यानुसारं रिक्तस्थानानि पूरयत-**

**(केवलं प्रश्नद्वयम्) 1x2=2**

(i) अरे कृष्ण! सत्यं किं .......... |

(क) ज्ञातानि (ख) ज्ञाताः

(ग) ज्ञातानां (घ) ज्ञातम्

(ii) ......... प्रतिज्ञा न कृता |

(1) अहं (ख) सः

(ग) मया (घ) मां

(iii) ते सर्वभूतहिते रताः मामेव .......... |

(1) प्राप्नोति (ख) प्राप्नोसि

(ग) प्राप्नुवन्ति (घ) प्राप्नोमि

**11. रेखाङ्कितस्य अशुद्धपदस्य स्थाने प्रदत्त-विकल्पेभ्यः शुद्धं पदं चित्वा लिखत- 1x3=3**

(i) त्वं यदि अस्याः पुत्रकं न **<u>मुञ्चन्ति</u>** |

(क) मुञ्चति (ख) मुञ्चामि

(ग) मुञ्चामः (घ) मुञ्चसि

(ii) किं **<u>भवन्तः</u>** अपि पितृवत् पुराणप्रवचनं करिष्यति|

(क) भवन्तौ (ख) भवन्तम्

(ग) भवान् (घ) भवतः

(iii) एकस्मिन् ग्रामोपान्ते पद्मिनी नाम्नी **<u>एकम्</u>** पुष्करिणी आसीत् |

(क) एका (ख) एकः

(ग) एकानि (घ) अनेकानि

(iv) अहं पितुः पक्षपुटान्तरम् **अविशाम** |

(क) अविशत् (ख) अविशम्

(ग) अविशः (घ) अविशन्

**12. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –** 5

सुब्बण्णस्य संगीते यः सहजाभिलाषः आसीत्, स एकदा राजभवने संवृत्या संगत्या पुनरधिकं दृढीबभूव। एकस्मिन् दिने पुत्रेण साकं पुराणिकशास्त्री राजभवनमेत्य तत्रान्तः पुरस्त्रीजनसमक्षे पुराणप्रवचनमारभमाण आदौ स्वपुत्रेण शुक्लाम्बरधरमित्यादि श्लोकं गापयामास तच्छ्रुत्वा तत्रत्याः सर्वे पर्यनन्दन्। अथ किञ्चित्कालानन्तरं तत्र समागतो राजा समुपविश्य पुराणमाकर्णयति स्म। पितुः पार्श्वे उपविष्टः सुब्बण्णः पुराणप्रवचनं कुतूहलेन शृण्वन्नेव मध्ये महाराजमपि सविस्मयं पश्यति स्म।

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** 1/2x2=1

(i) कस्य संगीते सहजाभिलाषः आसीत्?

(ii) पुराणिकशास्त्री केन साकं राजभवनं समागतः?

(iii) कः पुराणम् आकर्णयति स्म?

**(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)** 1x2=2

(i) सुब्बण्णस्य संगीते सहजाभिलाषः कथं दृढीबभूव?

(ii) पुराणिकशास्त्री स्वपुत्रेण किं गापयामास?

(iii) सुब्बण्णः कं सविस्मयं पश्यति स्म?

**(इ) निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्)** 1x2=2

(i) 'उपविष्टः सुब्बण्णः' अनयोः पदयोः किं विशेष्यपदं प्रयुक्तम्?

(ii) 'एकस्मिन् दिने पुत्रेण साकं' अत्र 'सह' पदस्य अर्थे किं पदं प्रयुक्तम्?

(iii) 'सुब्बण्णः महाराजमपि सविस्मयं पश्यति स्म' अत्र किं क्रियापदं प्रयुक्तम्?

**13. अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –** 5

**आतुरे व्यसने प्राप्ते दुर्भिक्षे शत्रुसंकटे।**
**राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ||**
**कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम्।**
**को विदेशः सविद्यानां कोऽप्रियः प्रियवादिनाम्।।**

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** 1/2x2=1

(i) शत्रुसंकटे यः तिष्ठति सः कः अस्ति?

(ii) केषां कृते कोऽपि विदेशः न अस्ति?

(iii) व्यवसायिनां कृते स्थानं किं न भवति?

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** 1x2=2

(i) समर्थानां कृते किं नास्ति?

(ii) बान्धवः कदा सह तिष्ठति?

(iii) केषां कृते कोऽपि अप्रियः नास्ति?

**(इ) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)** 1x2=2

(i) ‘राजद्वारे श्मशाने च यः तिष्ठति’ अत्र क्रियापदं किं प्रयुक्तम्?

(ii) ‘कटुभाषिणाम्’ पदस्य विलोमपदं किं प्रयुक्तम् ?

(iii) ‘यः तिष्ठति सः बान्धवः’ अत्र ‘सः’ इति सर्वनामपदं कस्मै प्रयुक्तम्?

**14. अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –** 5

**दौवारिकः** - (प्रविश्य) जयतु जयतु देवः।

**वै० गौराङ्गः** - दौवारिक ! सत्वरं त्रिचतुरांस्तन्तुवायान् समानय।

**दौवारिकः** - यद्देव आज्ञापयति। (बहिर्गत्वा त्रीन् तन्तुवायान् समानीय प्रविशति)

**वै. गौराङ्गः** - (तन्तुवायानुद्दिश्य) भो भो । यूयं निर्मितान् पटान् मह्यं दत्त।

**तन्तुवायाः** - न वयमयोग्यमूल्यत्वात् पटं निर्मामः।

**वै. गौराङ्गः** - अस्तु, शोभनं पटं निर्माय मह्यं दत्त, योग्यं मूल्यं भविष्यति। गृहाण इमाः मुद्राः। (इति पञ्चदशमुद्रा ददाति, ते न गृह्णन्ति, हठात्तेषां वसने निबध्य गलहस्तेन निष्कासयति)।

**तन्तुवायाः** - (द्वारि स्थिताः) महाराज ! न वयं शतमूल्यं पटं पञ्चदशभिरेव मुद्राभिर्निमास्यामः |

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** 1/2 x2=1

(i) सत्वरं कान् समानय?

(ii) वैदेशिको गौराङ्गः कति मुद्राः ददाति?

(iii) कः तन्तुवायानां शोषणं करोति?

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** 1x2=2

(i) तन्तुवायाः किमर्थं पटं न निर्मातुम् इच्छन्ति?

(ii) दौवारिकः बहिर्गत्वा किं करोति?

(iii) वैदेशिकः गौराङ्गः तन्तुवायान् उद्दिश्य किं कथयति?

**(इ) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)** 1x2=2

(i) 'अन्तः' इत्यस्य विलोमपदम् अत्र किं प्रयुक्तम्?

(ii) 'शोभनं पटं' अनयोः पदयोः विशेषणपदं किम्?

(iii) 'यूयं निर्मितान् पटान् मह्यं दत्त' अत्र कर्तृपदं किम्?

**15. अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत –**

1x3=3

**एकोऽप्यमात्यो मेधावी शूरो दक्षो विचक्षणः।**

**राजानं राजपुत्रं वा प्रापयेन्महतीं श्रियम् ॥**

**भावार्थः–** श्लोकेऽस्मिन् योग्यमन्त्रिणः गुणाः महत्वं च (i) ………. अस्ति । बुद्धिमान् शूरवीरः कुशलश्च एकः अपि (ii) …………. राजपरिवारं महतीं (iii) …………. प्रापयितुं शक्नोति ।

**मञ्जूषा**

| |
|---|
| मन्त्री, सम्पत्तिं, वर्णितम् |

**अथवा**

**प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-** 1x3=3

**(क) सन्निमितं वरं त्यागो विनाशे नियते सति |**

(i) यदि विनाशः निश्चितः तर्हि श्रेष्ठनिमित्ताय त्यागः वरम् भवति।

(ii) सन्निमितं त्यागः न कदापि करणीयः |

(iii) विनाशे सति किं निमित्तं त्यागः करणीयः |

**(ख) शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः। |**

(i) भक्तियुक्तः नरः शुभं अशुभञ्च कर्म न करोति |

**(ii)** शुभाशुभकर्मफलत्यागकर्ता भक्तियुक्तः नरः म ईश्वरस्य प्रियः |

**(iii)** यः केवलं शुभकर्मणां त्यागी सः मम प्रियः अस्ति |

**(ग) कच्चित्सहस्रान्मूर्खाणामेकमिच्छसि पण्डितम् ।**

(i) हे भरत! एकस्य पण्डितस्य अपेक्षा सहस्रान्मूर्खान् चिनोति |

**(ii)** हे भरत! सहस्रान्पण्डितेभ्यः एकं मूर्खं चिनोति |

**(iii)** हे भरत! सहस्रान्मूर्खेभ्यः एकं पण्डितं चिनोति |

**16. अधोलिखित-अन्वये रिक्तस्थानानि पूरयत –** 1x3=3

**संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः |**

**ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ||**

**अन्वयः** - (ये) इन्द्रियग्रामं (i)....... सर्वत्र समबुद्धयः ते (ii)......... रताः माम् एव (iii) .......... |

**मञ्जूषा**

| |
|---|
| सर्वभूतहिते, प्राप्नुवन्ति सन्नियम्य, लघुमूलम् |

17. **'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -** 1x4=4

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| (i) किमस्य पटस्य मूल्यम्? | (क) सत्यादपि हितं भवेत् \| |
| (ii) सत्यस्य वचनं श्रेयः | (ख) न शक्नोषि मयि स्थिरम् \| |
| (iii) अर्धपीतस्तनं मातुः | (ग) विंशत्यधिकं शतम् \| |
| (iv) अथ चित्तं समाधातुं | (घ) आमर्दक्लिष्टटकेसरम् \| |

**अथवा**

**अधोलिखितवाक्येषु रेखाङ्कितानां पदानां प्रसंगानुसारं शुद्धम् अर्थं लिखत-** 1x4=4

(i) **<u>अनिकेतः</u>** स्थिरमतिः भक्तिमान् मे प्रियो नरः |

(ii) एवं **<u>परितुष्टो</u>** राजा पारितोषिकत्वेन |

(iii) **<u>श्रेष्ठी</u>** - नहि नहि किञ्चिदधिकमेतत् |

(iv) तस्य **<u>करं</u>** धृत्वा मुनिः आश्रमम् आनीतवान् |

**मञ्जूषा**

| हस्तं, गृहहीनः, प्रसन्नः,व्यापारी |
|---|

# संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः

**18. संस्कृतभाषाया: उद्भवं विकासं पाठसन्दर्भं च अधिकृत्य प्रदत्तान् प्रश्नान् उत्तरत - (केवलं प्रश्नत्रयम् ) 1x3=3**

(i) सम् उपसर्गपूर्वकं ............ क्त प्रत्ययस्य योगेन 'संस्कृतशब्दः' निष्पद्यते|

(ii) 'अनुशासनम्' इति पाठः कस्याः उपनिषदः सङ्गृहीतः ?

(iii) संस्कृतभाषा कस्य परिवारस्य भाषा अस्ति?

(iv) 'कादम्बरी' इति ग्रन्थस्य लेखकः कः?

**19. वैदिकं साहित्यम् अधिकृत्य प्रदत्तवाक्येषु मञ्जूषाया: साहाय्येन रिक्तस्थानपूर्तिं कुरुत- 1x4=4**

(i) आरण्यकानां रचना ......... बभूव |

(ii) औषधीनां विज्ञानस्य वर्णनं ........ प्राप्यते |

(iii) वेदाङ्गानि........ सन्ति |

(iv) गुरूणां समीपे गत्वा या विद्या अधीते सा .......... अस्ति?

**मञ्जूषा**

| |
|---|
| षट्, उपनिषद्, अथर्ववेदे, अरण्ये |

**20. रामायणं महाभारतं पुराणानि च अधिकृत्य 'क' भागं 'ख' भागेन सह मेलयत- 1x3=3**

| **भाग 'क'** | **भाग 'ख'** |
|---|---|
| (i) रामायणे काण्डानि | (क) महाभारतस्य \| |
| (ii) गीता अंशः अस्ति | (ख) अष्टादश \| |
| (iii) पुराणानि | (ग) सप्त \| |